Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५९ / घ

Title काव्यप्रकाशः

Author मम्मटः। अलटः

Extent २०५ पत्र Age सं. १९०९

Subject अलङ्कारशास्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

काव्यप्रकाशः

१०५.

४५९

~~४[illegible]५९~~

© Dharmartha Trust J&K. Digitized by eGangotri

रुद्रमाला

सं० ४५४३ ग

[illegible] प्रकाश [illegible]

१०५ [illegible]

अलमारी [illegible]

खाना

[illegible]

लिपि सं० [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

विशिष्टोद्यानः नहस्यप्रनरन्तुन्यनिर्विघ्नानः

ॐ॰ का॰ प्र॰ १

ॐ श्रीगणेशाय विघ्नहर्त्रे सिद्धिकर्त्रे नमः ॐ नमः सरस्वतीरूपाय गुरवे सर्वशिष्यमलापहृद्य
ॐ ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत्परामृशति ॥ ॐ नियतिकृतनियमर

कवेरिति [illegible] तथक भावसंबंधेषष्ठी

हितां ह्लादैकमयीमनन्यपरतन्त्राम् नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।

गुणत्रयात्मात

नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावा परमाण्वाद्युपादानकर्मादिसहकारिका
रणपरतन्त्रा षड्रसा न च हृद्यैव तैः तेनाह शीब्रह्मणो निर्मितिर्निर्माणं एतद्विलक्षणा तु क
विवाङ्निर्मितिः अत एव जयति जयत्यर्थेन च नमस्कार आक्षिप्यते इति तां प्रत्यस्मि प्रणत इति

उचितानुचित परि ज्ञा नाय

लभ्यते इहाभिधेयं सप्रयोजनमाह । काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।

श्रवणसमकालभव परमानंदाय

सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे । कालिदासादीनामिव यशः श्रीहर्षादेर्बा
णादीनामिव धनं राजादिगतोचिताचारपरिज्ञानं आदित्यादेर्मयूरादीनामिवानर्थनिवारणं
सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादसमुद्भूतं विगलितवेद्यान्तरं परमानन्दं १

सकलानां यशःप्रभृतीनां प्रयोजनानां

गलितज्ञेयान्तरम्

ॐ॰ १

© Dharmartha Trust J&K. Digitized by eGangotri

यथा प्रभोर्यगणमादेशः सर्वत्र क्व्याहतमसरः यथात्राप्यप्रणेन हंतव्य इति गोर्न पद्यस्य ...या इत्यादि ... धान्यं ॥

नास्त्यपेक्षा ... प्रधानाः पुराणादयः

...न्ते न्यक... त्वदंत्या ... वक्ता पार्थप्राधान्ये काव्यं भवेत्।

प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शा

रसस्य शृंगारादेरंगभूतो व्यापारः ... जयानन्तः ... सूक्ष्मं ... लंकार रसो येनेतं

ब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुण

रामादिवदिति ... रामचन्द्रादि ... लोकव्यवहार ... करोति कान्तेव यथा कान्ता

कविकर्म तत्कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदे

यथायोगमिति ... काव्यकर्तृत्व ... ॥ यत्नः कार्यः काव्यस्य साधारणप्रयोजनत्वात् ... रससतापादनेन ... योजयति ... तथा काव्यमपीत्यर्थः इति

शं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ॥ अस्य कारणमाह । शक्ति

निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे । शक्तिः

भावनिष्ठो भावकव्यापारो भावना ... संस्कारः ... प्रतिभेति ।

कवित्वबीजरूपः संस्कारविशेषो यां विना काव्यं न प्रसरेत् प्रसृतं वोपहसनीयं स्यात् लोक

स्य स्थावरजङ्गमात्मकस्य लोकवृत्तस्य शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्ग

गजतुरगखड्गादिलक्षणग्रन्थानां काव्यानां च महाकविसंबन्धिनामादिग्रहणादितिहासा

दीनां विमर्शनाद्व्युत्पत्तिः काव्यं कर्तुं विचारयितुं ये जानन्ति तदुपदेशेन करणे योजने च पौनः

पुन्येन प्रवृत्तिरिति त्रयः समुदिता न तु व्यस्ताः काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः

भावे रसे निष्ठः भावस्य चर्वयितृव्यापारः भावनेति ।

© Dharmartha Trust J&K. Digitized by eGangotri

शब्दार्थौ न त्काव्यं न केवलः शब्दो न केवलोऽर्थः किंतु शब्दार्थौ मिलितौ काव्यमित्याह द्विवचनेनेत्यर्थः ॥

मुख्यार्थापकर्षो दोषः अंगिभूतरसोत्कर्षो गुणः काव्यशोभावहो धर्मोऽलंकारः रससमवायिनो धर्मा गुणाः रससंयोगहन्तारः अलंकाराः अनलंकृती इत्यत्र नञीषदर्थे ॥

का॰ प्र॰ २

एवमस्यकारणमुक्त्वास्वरूपमाह । तददोषौशब्दार्थौसगुणावनलंकृतीपुनःक्वापि । दोषगुणा लंकारावक्ष्यंते । क्वापीत्यनेनैतदाह । यत्सर्वत्रसालंकारौक्वचित्तुस्फुटालंकारविरहेपिनकाव्य त्वहानिः । यथा । यःकौमारहरःसएवहिवरस्ताएवचैत्रक्षपास्तेचोन्मीलितमालतीसुरभयः

हृतवान् — उन्मीलितनाविकसिततया मालतीतद्गन्धरभयः — उन्मादकारिणः

प्रौढाःकदंबानिलाः साचैवास्मितथापितत्रसुरतव्यापारलीलाविधौ रेवारोधसिवेतसीत रुतलेचेतःसमुत्कंठते । अत्रस्फुटोनकश्चिदलंकारः रसस्यहिप्राधान्यान्नालंकारतातद्भेदान्क्र मेणाह । इदमुत्तममतिशयिनिव्यंग्येवाच्याद्ध्वनिर्बुधैःकथितः इदमितिकाव्यंबुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यंग्यव्यंजकस्यशब्दस्यध्वनिरितिव्यवहारःकृतः ततस्तन्मतानुसारिभिः न्यैरपिन्यग्भावितवाच्यव्यंग्यव्यंजनक्षमस्यशब्दार्थयुगलस्ययथा । निःशेषच्युतचंदनंस्तनत टंनिर्मृष्टरागोधरो नेत्रेदूरमनंजनेपुलकितातन्वीतवेयंतनुः मिथ्यावादिनिदूतिबांधवजनस्या ज्ञातपीडागमा वापींस्नातुमितोगतासिनपुनस्तस्याधमस्यांतिकं । अत्रतदंतिकमेवरंतुंगतासि

टी॰ २

अत्रस्फोटनकश्चिदलंकारः इति अत्रविभावनाविशेषोक्ती अस्फुटे तथाहि कौमारहरवरासन्निधानादीन्युत्कंठाकारणानि तदभावः कौमारवरसन्निधानादिः अतः कौमारहरवरा सन्निधानाद्युत्कंठाकारणाभावेपि उत्कंठायाउत्पत्तौ विभावना कारणाभावेकार्योत्पत्तिर्विभावना तथाकौमारहरवरादि सन्निधाद्युत्कंठाकारणसत्त्वायां अनुत्कंठाया अनु त्पत्तौविशेषोक्तिः कारणसामग्र्यांकार्यानुत्पत्तिर्विशेषोक्तिः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

इतिप्राधान्येनव्यपदिश्यते । अतादृशिगुणीभूतव्यंग्यंव्यंग्येतुमध्यमं । अतादृशिवाच्यादनतिशा
यिनि । यथा । ग्रामतरुणंतरुण्यानववंजुलमंजरीसनाथकरं पश्यंत्याभवतिमुहुर्नितरां
मलिनामुखच्छाया । अत्रवंजुललतागृहेदत्तसंकेतानागतेतिव्यंग्यंगुणीभूतं तदपेक्ष
यावाच्यस्यैवचमत्कारकारित्वात् । शब्दचित्रंवाच्यचित्रमव्यंग्यंत्ववरंस्मृतं । चित्रमितिगुणा
लंकारयुक्तं अव्यंग्यमितिस्फुटप्रतीयमानार्थरहितं अवरमधमं । यथा । स्वच्छंदोच्छलदच्छकच्छकु
हरच्छातेतरांबुच्छटा मूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नायवः भिद्यादुद्यदुदारदर्दु
रदरीदीर्घादरिद्रद्रुम द्रोहोद्रेकमहोर्मिमेदुरमदामंदाकिनीमंदतां । विनिर्गतंमानदमात्म
मंदिराद्भवत्युपश्रुत्ययदृच्छयापियं ससंभ्रमेंद्रद्रुतपातितार्गलानिमीलिताक्षीवभियामराव
ती ॥ इतिश्रीकाव्यप्रकाशेकाव्यप्रयोजनकारणस्वरूपभेदनिर्णयोनामप्रथमउल्लासः
॥ १ ॥ ॐ क्रमेणशब्दार्थयोःस्वरूपमाह । स्याद्वाचकोलाक्षणिकःशब्दोत्रव्यंजकस्तथा ।

अत्रकवर्गगोष्ठीति

भक्तिबलापनेनरत्यादयो भावो विभज्यते परं च चमत्कारकारित्वा दस्फुटरसत्वर्थः ॥

उपयोगवम्

अत्रनायिका रूपस्यव्यंग्यस्यचमत्कारकारित्वा दस्फुटत्वम्

पदनियतजिज्ञासाआकांक्षा आकांक्षितस्यानेकस्यसंनिधिः संबंधार्हत्वं योग्यता
कालत्रयान्यतमसंसर्गोवायोग्यता तद्वशात् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तात्पर्यार्थ इति तात्पर्यार्थपरनामधेयो विशेषः क्रियाकारकादिसंबंधलक्षणः वपुः शरीरं यस्य स विशेषवपुः क्रियाकारकादिसंबंधविशेषमयः अपदार्थोऽपीति पदैरनाख्योऽपि वाक्यार्थः समुल्लसति ॥

का॰ अत्रेति काव्ये एषां स्वरूपं वक्ष्यते । वाच्यादयस्तदर्थाः स्युः वाच्यलक्ष्यव्यंग्याः तात्पर्यार्थोऽपि केषु
प्र॰ चित् । आकांक्षासन्निधियोग्यतावशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशे
३ षवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीति अभिहितान्वयवादिनां मतं वाच्य एव वाक्यार्थ इति

स्वार्थसहितानि पदान्येव वाक्यार्थमभिदधतीत्यन्यः

3 त्वन्विताभिधानवादिनः । सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते । तत्र वाच्यस्य यथा । मा

मातः गृहोपकरणमद्य खलु नास्तीति साधितं त्वया तत् भण किं करणीयम् एवमेव न वासरः तिष्ठति

ए घरोवअरणं अज्ज हु णत्थि त्ति साहिअं तुमए । ता भण किं करणिज्जं एमेअ ण वासरो ठाइ । अत्र

साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मम

स्वैरविहारार्थिनीति व्यज्यते । लक्ष्यस्य यथा । साहेन्ती सहि सुहअं खणे खणे दूम्मिआसि मज्झ

कृते सद्भावस्नेहकरणीयसदृशं तावत् विरचितं त्वया

कए सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए । अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितं

पश्य निश्चलनिष्पन्दा

लक्ष्यं तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यंग्यं व्यंग्यस्य यथा । उअ णिच्चलणिप्पन्दा निश्चला शरीरेण

बिसिनीपत्रे राजते बलाका निर्मलमरकतभाजनप्रतिष्ठिता शङ्खशुक्तिरिव

भिसिणीपत्तम्मि रेहइ बलाआ णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व । अत्र निस्पन्दत्वे परिहीना निस्पन्दा अङ्गकम्परहिता

नाश्वस्तत्वं तेन च जनरहितत्वं अतः संकेतस्थानमेतदिति कयाचित्कंचित्प्रत्युच्यते अथवा मिथ्या गी॰ ३

अथवा यदि त्वया नागतं तदा बलाकाया निस्पन्दत्वेन भवतीति व्यंग्यमित्यर्थः

© Dharmartha Trust J&K. Digitized by eGangotri

अगृहीतसंकेतस्यार्थमात्रमतीतिरस्तीति तद्दृष्योऽर्थविशेषग्रहणं संकेतेनाम शब्दार्थयोः संबन्धावधारणं संकेतितमर्थं साकल्येन प्रतीतिमिमं नेति संकेति तार्थाभिधायकत्वस्य गतेरुः शाब्दत्वादिति भास्करः यम् ॥

संकेतितपदं लक्षणीयार्थनिरासार्थं साक्षात्पदं चेव्यवहितस्यार्थस्य निरासार्थं शब्देति लोक व्यवहारे वाच्यवाचकभावलक्षणः संकेतः गोशब्दस्येदं सास्नादिमत्त्वं वाच्यम् अस्य सास्ना दिमत्त्वस्य गोशब्दो वाचक इत्येवं रूपः संकेतग्रहः ॥

वदस्मिन्नत्वत्रगतोभूदिति निर्व्यज्यते । वाचकादीनां क्रमेण स्वरूपमाह । साक्षात्संकेतितं योऽर्थ मभिधत्ते स वाचकः । इहागृहीतसंकेतस्य शब्दस्यार्थविशेषप्रतिपत्तेरभावात्संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन संकेतो गृह्यते स तस्य वाचकः संकेतित श्चतुर्भेदो जात्यादिर्जातिरेव वा । यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव । तथाप्यानन्त्याद्व्यभिचाराच्च तत्र संकेतः कर्तुं न पार्यते इति गौः शुक्लश्चलो डित्थ इत्यादीनां शब्दानां विषयविभागो न स्यादिति च तदुपाधावेव संकेतः । उपाधिश्च द्विविधो वस्तुधर्मो वक्तृयदृच्छासन्निवे शितश्च । वस्तुधर्मोऽपि द्विविधः सिद्धः साध्यश्च । सिद्धोऽपि द्विविधः पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च । तत्राद्यो जा तिः । उक्तं च वाक्यपदीये । न हि गौः स्वरूपेण गौर्नाप्यगौः गोत्वाभिसंबन्धात्तु गौरिति । द्वितीयो गुणः शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते । साध्यः पूर्वापरीभूतावयवः क्रियारूपः । डित्थादिश ब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं पूर्वपूर्ववर्णजनितसंस्कारसहितोऽन्त्यवर्णो वक्त्राय

साध्य इति न त्रिधोनः सर्वापरीभूताः वयवक्रिया रूप इति जयंतः ।

नासादयति सप्तोतः । द्वितीयः सिद्ध उपाधिर्वि शेषाधानहेतुः गुणः कथ्यते जातिसामर्थ्याद्दासस्य रूपस्य ... पदार्थस्य वि शेषाधानहेतुरुपाधिर्गुणः कथ्यते ...

सकयावृत्त्यानियास्मन्त्यबुद्धिनिर्ग्राह्यं क्रमसहितं वाक्यानानेकदेशकालावच्छेदेन लक्षणः समुदायः संभवति तथाहि न खलु डित्थशब्दोच्चारणे काले स्यशब्दोऽस्ति यशब्दोच्चारणकाले वा डिशब्दः तथा चस्म र्यमाणानुभूयमानवर्णसमूहः शब्द इति संकेते ग्रहणं संहृतक्रमं उपसंहृतपूर्वापरीभावं त्वयंत्याम् ॥

शब्दस्य सातोमदोपाधिनिबंधनत्वं सत्ता जातिः शब्दो गवादिः ... स्ववत्त्वो न वि... शुक्लादिकमाधिरिति जयंतः

© Dharmartha Trust J&K. Digitized by eGangotri

का०
प्र०
४

इच्छयाऽइत्यादिष्वर्थेषु प्राधान्येन सन्निवेशयन्निति समन्वयानुरोधाद् ज्ञानमकरोदिति गौः शुक्लश्च

महाभाष्यकृतिभाष्य... विवरणे ॥ परमाणुत्व... परि

लऽइत्यत्र गन्धादौ च जातिगुणक्रियाणां प्रवृत्तिः । इति श्रीमहाभाष्यकारः परमाणुत्वादीनां गुणा

माणुत्वादि भाष्य... जातिरेव ... गुणादीनां ... इत्याशंक्याह गुणक्रियायदृ

मध्यपाठात् पारिभाषिकेषु गुणत्वे गुणक्रियायदृच्छानां वस्तुत एकरूपाणामाश्रयभेदाद्भेद इव ल

च्छाशब्दत्वेन सर्वे हि नाना ... सर्वेषामपि जातिनिबन्धनम् ।

क्ष्यते । यथा । एकस्य मुखस्य स्वरूपस्य खड्गदर्पणतैलाद्यालम्बनभेदात् हिमवद्गिरिः शालाद्याश्रयेष

परमार्थतो भिन्नेषु शुक्लादिषु यदृच्छेन शुक्लः शुक्ल इत्यभिन्नाभिधानप्रत्ययोत्पत्तिः नन्वशुक्लादि

इत्यादिषु ... सामान्यमेव यदृच्छेनायं डित्थोऽयं डित्थ इत्यभिन्नाभिधानप्रत्ययोत्पत्तिः ।

सामान्ये गुणत्वे दृष्टादिपाकेष्वेवमेव पाकादित्वं बाल्यवृद्धत्वादिकं शारीरिकाद्यवस्थाभेदे डित्थ इत्यादि

शब्देषु च प्रतीतेषु गुणाभिन्नमानेन वाऽऽइत्याद्यर्थे ऽइत्याद्युत्वमस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्ति

निमित्तमित्यन्ये नत्वानपोह्यो वा शब्दार्थः केचित्तु कस्यचित् ग्रन्थगौरवभयात्स्वकृतौ त्रयपदार्थवादिनो

हदर्शितं । स च ध्वन्योऽर्थः तत्र शब्दव्यापारो ध्वन्याभिधीयते । सहानिमात्रात्सङ्केतितः संस्थेतिव

ग्रं०
४

हस्य । सत्यार्थबाधेन योगेऽप्यनिर्णीयप्रयोजनात् । अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता ।

० अगोत्वनिषेधो हि शब्दार्थो न तु गोत्वविधिः अतएवापोहात्मकशब्दार्थस्वीकृतः नास्त्यर्थैः बोधः ॥ अपोहः शब्दार्थः कथमित्याह ज्ञानविचारासहत्वा सङ्केतत्वेन संकेतस्य कर्तृ ... शब्दानामयं वादिव्याप्तेर्निर योऽर्थः शब्दवाच्यः शब्दार्थ इति बौद्धाः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

क्रिया कर्मणि कुशल इत्यादौ दर्भग्रहणाद्ययोगात् गंगायां घोष इत्यादौ च गंगादीनां घो
षाद्यधिकरणत्वासंभवान्मुख्यस्यार्थस्य बाधे विवेचकत्वादौ सामीप्यादौ च संबंधे रूढितः
प्रसिद्धेः तथा गंगातटे घोष इत्यादेः प्रयोगाद्येषां न तथा प्रतिपत्तिस्तेषां पावनत्वादीनां धर्माणां
तथाप्रतिपादनात्मनः प्रयोजनाच्च मुख्येनामुख्योऽर्थो लक्ष्यते यत्स आरोपितः शब्दव्यापा
रः सांतरार्थनिष्ठो लक्षणा । स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणं उपादानं लक्षणं चे
त्युक्ता शुद्धैव सा द्विधा । कुंताः प्रविशंति यष्टयः प्रविशंतीत्यादौ कुंतादिभिरात्मनः प्रवे
शसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यंते ततः उपादानेनेयं लक्षणा गौरनुबंध्य इत्या
दौ श्रुतिचोदितमनुबंधनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते विशेष्यं
नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति न्यायादित्युपादानलक्षणा तु नोदाहर्तव्या न
ह्यत्र प्रयोजनमस्ति न वा रूढिः व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते यथा क्रिय

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ नामित्यत्र कर्तोऽकस्य इत्यत्र कर्मप्रविशयेति पिंडीमित्यादौ गृह्णं भक्षयेत्यादि पीनो देवदत्तो दिवा
प्र॰ न भुंक्ते इत्यत्र रात्रिभोजनं न लक्ष्यते श्रुतार्थापत्तेर्वा तस्य विषयत्वात् गंगायां घोष इत्यत्र
५ तटस्य घोषाधिकरणत्वार्थाः सिद्धये गंगाशब्दः स्वमर्पयति इत्येवमादौ लक्षणेनैषा लक्षणा
5
उभयरूपा चेयं शुद्धोपचारेणामिश्रत्वात् अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च भेदरूपं तटस्थत्वं
संबंधाविवक्षणात् गंगायां घोष इत्यत्र न भेदः तटादीनां गंगादिशब्दैः प्रतिपादने तत्त्वप्रति
पत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः गंगासंबंधमात्रप्रतीतौ तु गंगातटे घोष इति
मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः । सारोपान्या यत्रोक्तौ विषयी विषयस्तथा आरो
प्यमाणआरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सा
रोपा । विषय्यंतःकृतेन्यस्मिन्नारोपविषये सति । साध्यवसाना । भेदाविमौ च सादृश्यात्
संबंधांतरतस्तथा । गौणौ शुद्धौ च विज्ञेयौ । इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ गं॰ ५

© Dharmartha Trust J&K. Digitized by eGangotri

गौर्वाहीक इत्यत्र गौरयमित्यत्र च अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयः लक्ष्यमा
णा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्तीति केचित् स्वार्थसहचारिगुणा
भेदेन परार्थगता गुणा एव लक्ष्यन्ते न तु परार्थोऽभिधीयत इत्यपरे साधारणगुणाश्रयणेन प
रार्थ एव लक्ष्यत इत्यन्ये। उक्तं चान्यत्र। अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते लक्ष्यमा
णगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति अविनाभावोऽत्र संबन्धमात्रं न तु नान्तरीयकत्वं तत्त्वे हि मञ्चाः
क्रोशन्तीत्यादौ लक्षणा न स्यात् अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तं
आयुर्घृतं आयुरेवेदमित्यादौ सादृश्यादन्यत्कार्यकारणभावादिसंबन्धान्तरे एवमादौ च का
र्यकारणभावादिलक्षणपूर्वे आरोपाध्यवसाने अत्र गौणभेदयोः भेदेऽपि ताद्रूप्यप्रतीतिः
सर्वथैवाभेदावगमश्च प्रयोजनं शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वा
दि क्वचित्तादर्थ्यादुपचारो यथा इन्द्रार्था स्थूणा इन्द्रः क्वचित्स्वस्वामिभावाद्यथा राजकीयः

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ २

6

पुरुषो राजा क्वचिदवयवावयविभावाद्यथा अग्रहस्त इत्यत्राग्रमात्रेऽवयवे हस्तः क्वचित्तात्क
र्म्याद्यथा अतक्षा तक्षा। लक्षणा तेन षड्विधा। आद्यभेदाभ्यां सह सा च। व्यङ्ग्येन रहिता रूढौ
सहिता तु प्रयोजने। प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव। तच्च गूढमगूढं वा। तच्चेति व्यङ्ग्यं
तत्र गूढं यथा। मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं समुच्छलितविभ्रमा गतिरपास्तसं
स्थामतिः उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते।
अगूढं यथा। श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानां उपदिशति कामिनीनां
यौवनमद एव ललितानि। अत्रोपदिशतीति। तदेषा कथिता त्रिधा। अव्यङ्ग्या गूढव्यङ्ग्या अगूढ
व्यङ्ग्या च। तद्भूर्लाक्षणिकः। शब्द इति संबध्यते तद्भूस्तदाश्रयः। तत्र व्यापारो व्यञ्जनात्म
कः। कुत इत्याह। यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते फले शब्दैकगम्येऽत्र व्यञ्जनान्ना
परा क्रिया। प्रयोजनप्रतिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिरपि तु गो॰ २

© Dharmartha Trust J&K. Digitized by eGangotri

ऽर्पितत्वेन तस्मादेव शाब्दात् न चात्र व्यंजनादृतेन्यो व्यापारः तथा हि। नाभिधा समयाभावात्।
गंगायां घोष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयंते न तत्र गंगादिशब्दाः संकेतिताः
हेत्वाभावान्न लक्षणा। मुख्यार्थबाधादित्रयं हेतुः। तथा च। लक्ष्यं न मुख्यं नाप्यत्र बाधो
योगः फलेन नो न प्रयोजनमेतस्मिन्न च शब्दः स्खलद्गतिः। यथा गंगाशब्दः स्रोतसि सबाध
इति तटं लक्षयति तद्वत्तटेपि सबाधः स्यात्प्रयोजनं लक्षयेत् न च तटं मुख्योर्थः नाप्यत्र बाधः
न च गंगाशब्दार्थस्य तटस्य स्रोतोगतपावनत्वाद्यैः लक्षणीयैः संबंधः नापि प्रयोजने लक्ष्ये
किंचित्प्रयोजने नापि गंगाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः। एवमप्यनव
स्थास्याद्या मूलक्षतिकारिणी। एवमपीति प्रयोजनं चेल्लक्ष्यते तत्प्रयोजनांतरेण तदपि प्रयो
जनांतरेणेति प्रकृताप्रतीतिकृदनवस्था भवेत् न च शैत्यपावनत्वादिधर्मयुक्तमेव तटं लक्ष्य
ते गंगातटे घोष इत्यतोधिकस्यार्थस्य प्रतिपत्तिश्च प्रयोजनमिति विशिष्टे लक्षणा तत्किं व्यंज

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ७

नेनेत्याह । प्रयोजनेन सहितं लक्षणीयं न युज्यते । कुत इत्यत आह । ज्ञानस्य विषयो ह्यन्यः
फलमन्यदुदाहृतं । प्रत्यक्षादेर्नीलादिर्विषयः फलं प्रकटता संविद्वा । विशिष्टे लक्षणा नैवं ।
व्याख्यातं । विशेषाः स्युस्तु लक्षिते । तटादौ ये विशेषाः पावनत्वादयः ते चाभिधातात्पर्यलक्ष
णाभ्यो व्यापारांतरेण गम्याः तच्च व्यंजनध्वननादिशब्दवाच्यमवश्यमेषितव्यं एवं लक्षणामूलं
व्यंजकत्वमुक्तं । अभिधामूलमाह । अनेकार्थस्य शब्दस्य वाचकत्वे नियंत्रिते संयोगाद्यै
रवाच्यार्थधीकृद्व्यापृतिरंजनं संयोगो विप्रयोगश्च साहचर्यं विरोधिता अर्थः प्रकरणं लिं
गं शब्दस्यान्यस्य सन्निधिः सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः शब्दार्थस्यानवच्छे
दे विशेषस्मृतिहेतवः ॥ इत्युक्तदिशा सशंखचक्रो हरिः अशंखचक्रो हरिरित्युच्यते राम
लक्ष्मणाविति दाशरथ्योः रामार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः स्थाणुं भज भवच्छि
दे इति हरे सर्वं जानाति देव इति युष्मदर्थे कुपितो मकरध्वज इति कामे देवस्य पुरारातेरिति रां॰ ७

© Dharmartha Trust J&K. Digitized by eGangotri

शंभो मधुनामत्तकोकिलइतिवसंते पातुवोदयितामुखमितिसाम्मुख्ये भात्यत्रपरमे

श्वरइतिराजधान्यां रूपाद्देशाद्राजनि चित्रभानुर्भातीतिदिने रवौ रात्रौवह्नौ मित्रंभाती

तिसुहृदि मित्रोभातीतिरवौ इंद्रशत्रुरित्यादौवेदएवनकाव्ये स्वरोविशेषप्रतीतिकृत्

शादिग्रहणात् । इयद्धस्तमित्यादौ शयद्धस्तमिवेहि शुक्तिवद्धेहि इयद्धस्तमित्यावक्ता प

द्धस्तमिवेहिहिदिशपदेहि । इत्यादावभिनयादयः इत्थंसंयोगादिभिरर्थान्तराभिधायकत्वे

निवारितेऽप्यनेकार्थस्यशब्दस्ययत्क्वचिदर्थान्तरप्रतिपादनं तत्रनाभिधानियमनात्तस्याः न

लक्षणामुख्यार्थबाधाद्यभावात् अपितुअंजनंव्यंजनमेवव्यापारः । यथा । भद्रात्मनो

दुरधिरोहतनोर्विशालवंशोन्नतेःकृतशिलीमुखसंग्रहस्य यस्यानुपप्लुतगतेःपरवारण

स्यदानाम्बुसेकसुभगःसततंकरोऽभूत् । तद्युक्तोव्यंजकःशब्दः । तद्युक्तोव्यंजनयुक्तः

यत्सोऽर्थान्तरयुक्तथा अर्थोऽपिव्यंजकस्तत्रसहकारितयामतः । तद्युक्तेतिव्यंजकः ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ८

इतिश्रीकाव्यप्रकाशेशब्दनिर्णयोनामद्वितीयउल्लासः ॥ २ ॥ श्रीविघ्नहारिणेनमः

ॐअर्थाःप्रोक्ताःपुरातेषां । अर्थावाच्यलक्ष्यव्यंग्याः तेषांवाचकलाक्षणिकव्यंजकानां ।

अर्थव्यंजकतोच्यते । कीदृशीत्याह । वक्तृबोद्धव्यकाकूनांवाक्यवाच्यान्यसन्निधेः प्र

स्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषां योऽर्थस्यान्यार्थधीहेतुर्व्यापारोव्यक्तिरेवसा ।

बोद्धव्यःप्रतिपाद्यः काकुर्ध्वनेर्विकारः प्रस्तावःप्रकरणं अर्थस्यवाच्यलक्ष्यव्यंग्यात्मनः

अ ति पृ थु लं जल कुं भं गृ ही त्वा स मा ग ता स्मि स खि त्व रि त म् श्र म स्वे द स लि

क्रमेणोदाहरणं । अइपिहुलंजलकुंभंघेत्तूणसमागदम्हिसहितुरिअम् समसेअसलि

ल निः श्वा स निः स हा वि श्रा मा मि क्ष णम्   गे त्रि ष्य दौ र्बु ल्यं चि न्ता

लणीसासणीसहावीसमामिखणं । अत्रचौर्यरतगोपनंगम्यते । ओण्णिद्दंदोब्बल्लंचिन्ता

अ ल स त्वं स निः श्व सि तं मे म न्द भा ग्या याः कृ ते स खि त्वा म पि अ ह ह प रि भ व ति

अलसत्तणंसणीससिअं महमंदभाइणीएकेरंसहितुहविअहहपरिहवइ । अत्रदू

त्यास्तत्कामुकोपभोगोव्यज्यते तथाभूतांदृष्ट्वानृपसदसिपांचालतनयांवनेव्याधैःसार्धं

सुचिरमुषितंवल्कलधरैः विराटस्यावासेस्थितमनुचितारंभनिभृतं गुरुःखेदंखिन्नेमयिभ गे॰ ८

© Dharmartha Trust J&K. Digitized by eGangotri

जेनिवाधायपिञ्जरस्स । अत्रमध्येनयोगपः खेदः जंरहस्सतयोरपदृनिकाश्चायकाययते नच

वाच्यासिद्धोगमत्रकाञ्जरितिग्रणोभूतव्यंग्यत्वेशाकुंप्रभ्रमाद्रेणापिकाकोविश्रान्तेः । तो

रा मम गे इस्य ल नि मित्रा दृष्टिन वे नु र्यीः अन्यनः इदानी से वा ग्र हे तो चे क पा लो न सा ह ष्टिः

हूअमझगत्तहूणिमित्तोदिहिणामि अस्सनइंगहूस्स अन्तहूंनेंधकवोलेणसादिट्ठी ।

अत्रमस्यांवीकपोलप्रतिबिंबितांप्रयप्यतलेहवृष्टिरन्येवाभूत चलिनायांत्तस्यामन्येवजा

तेत्यहृतैनेमध्यत्रकाशकत्वं इतिव्यज्यते । उहेप्रोयंसवसकदलीस्त्रोणिगोभातिसाधीउ

जोत्कर्षांकृविनरमणोविभ्रमोनमेदायः किंचैनस्मिन्कुबन्तसहृदलन्निवतेवांनिवाता ये

नियोजयति ग्र ना इ म

षामग्रेसरनिकलिनाकोदकोपोमनोभूः । अत्रवनार्थेप्रविशोनिवाय्यते । एउजेइअणहूलम

नाः अब्र मो एह भावे से ण ले त्व ण मा धे यदि संध्यायां भवति वि मा मः

णाअत्रामवेरबरासिमसंग्रहलसि खणमेत्रजइसमारहहोइणबहोइवीसामो । अत्रसंध्या

संकेतकालइतिनटसंप्रतिकयाचितयोत्यते । सर्वइसमागमेस्यादितेज्ञापिपअर्जपदा

रमितेन पमेप्राकिविदिषुमिनामलहूमजेसवकानिजं । अत्रोपपतिंप्रत्युपसतेप्रकृतनान

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ५

यत्कामिति निवार्यते । अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः नाहं हि दूरं
भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः । अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वयाभि-
सार्य इत्याश्वस्तां प्रति कयाचिन्निवेद्यते । गुरुअणपरवस पिअ किं भणामि तुह मन्दभाइणी
अहअं अज्ज पवासं वच्चसि वच्च सअं ज्जेव सुणसि करणिज्जं । अत्राद्य मधुसमये यदि व्र-
जसि अहं न भवामि यावत् भवतस्तु न जानामि गतिमिति व्यज्यते । आदिग्रहणाच्चेष्टादेः ।
तत्र चेष्टाया यथा । द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया प्रोल्लास्योरुयुगं परस्परस-
मासक्तं समासादितं आनीतं पुरतः शिरोंऽशुकमधः क्षिप्ते चले लोचने वाचस्तत्र निवारितं प्र-
सरणं संकोचिते दोर्लते । अत्र चेष्टया प्रच्छन्नकान्तविषय आकूतविशेषो ध्वन्यते निराकांक्षता
प्रतिपत्तये प्राप्तावसरतया पुनः पुनरुदाह्रियते वक्त्रादीनां मिथः संयोगे द्विकादिभेदेन व-
क्त्रबोद्धव्यसंयोगे यथा । अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि मा पहिअ रत्तिअन्ध

गे॰ ५

श ख्या यां श्राव ञ्यो: श यि ष्ठा:

अस्मिन्नाहमहण्यसन्निहिसि । अनेनैवक्रमेणालक्ष्यक्रमव्यंग्ययोर्व्यंजकत्वमुदाहार्यम् ।
शाब्दप्रमाणवेद्योर्थोव्यनक्त्यर्थान्तरंयतः अर्थस्यव्यंजकत्वेतच्छब्दस्यसहकारिता ।
शाब्देतिनहिप्रमाणान्तरवेद्योर्थोव्यंजकः ॥ ॥ इतिश्रीकाव्यप्रकाशेऽर्थनिर्णयोनाम
तृतीयउल्लासः ॥ ३ ॥ ॐ यद्यपिशाब्दार्थयोर्निर्णयेकृते दोषगुणालंकाराणांस्व
रूपमभिधानीयं तथापिधर्मिणिप्रदर्शिते धर्माणांहेयोपादेयताज्ञायते इतिप्रथम
मेवकाव्यभेदानाह । अविवक्षितवाच्योयस्तत्रवाच्यंभवेद्ध्वनौ अर्थान्तरेसंक्रमितमत्य
न्तंवातिरस्कृतम् । लक्षणामूलगूढव्यंग्यप्राधान्येसति अविवक्षितवाच्योयत्रध्व
नाविति अनुवादादात्मध्वनिरितिज्ञेयं तत्रवाच्यंक्वचिदनुपपद्यमानत्वादर्थान्तरेपरिण
मितं । यथा । त्वामस्मिवच्मिविदुषांसमवायोत्रतिष्ठति आत्मीयांमतिमादायस्थिति
मत्रविधेहितत् । अत्रवचनादुपदेशादिरूपतयापरिणमति क्वचिदनुपपद्यमानतयार्थ

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ १॰ 10

न्येनतिरस्कृतंयथा। उपकृतंबहुतत्रकिमुच्यतेसुजनताप्रथिताभवतापरं विदधदीदृ
शमेवसदासखेसुखितमास्स्वततःशरदांशतं। एतदपकारिणंप्रतिविपरीतलक्षणया।
कश्चिद्वक्ति। विवक्षितंचान्यपरंवाच्यंयत्रापरस्तुसः। अन्यपरंव्यंग्यनिष्ठं एषच।
कोप्यलक्ष्यक्रमव्यंग्योलक्ष्यव्यंग्यक्रमःपरः। अलक्ष्येति नखलुविभावानुभावव्यभिचा
रिणएवरसाः अपितुरसैस्तैरित्यस्तिक्रमः सचनलक्ष्यतेत्र। रसभावतदाभासभावशां
त्यादिरक्रमः भिन्नोरसाद्यलंकारादलंकार्यतयास्थितिः। आदिग्रहणाद्भावोदयभाव
संधिभावशबलत्वानि प्रधानतयायत्रस्थितोरसादिस्तत्रागुणीभूतेलंकार्यैः यथोदाहरि
ष्यते अन्यत्रतुप्रधानेवाक्यार्थेयत्रांगभूतोरसादिस्तत्रगुणीभूतव्यंग्येरसवत्प्रेयऊर्जस्वि
समाहितादयोलंकाराः तेचगुणीभूतव्यंग्याभिधानेउदाहरिष्यते। तत्ररसस्वरूपमाह
कारणान्यथकार्याणिसहकारीणियानिच रत्यादेःस्थायिनोलोकेतानिचेन्नाट्यकाव्ययोः श्री॰ १॰

© Dharmartha Trust J&K. Digitized by eGangotri

विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारिणः व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः
उक्तं हि भरतेन । विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति एतद्विवृणुते विभावै
र्ललनोद्यानादिभिः आलंबनोद्दीपनकारणैः स्थायी भावो रत्यादिको जनितः अनुभावैः
कटाक्षभ्रूभंगाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः
सहकारिभिरुपचितः मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसंधानान्नर्तकेपि प्रतीय
मानो रसः इति भट्टलोल्लटप्रभृतयः रामएवायमयमेवरामइति नरामोयमित्यौत्तरकालि
केबाधे रामोयमिति रामःस्याद्वानवायमिति रामसदृशोयमिति च सम्यङ्मिथ्यासंशय
सादृश्यप्रतीतिविलक्षणया चित्रतुरगन्यायेन रामोयमिति प्रतिपत्त्या ग्राह्ये नटे सेयं म
मांगेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः । मनोरथश्रीर्मनसः शरीरिणी प्राणे
शरी लोचनगोचरं गता इति दैवादहमद्य तया चपलायतनेत्रया वियुक्तस्तु । अविरल॰

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ए ॥

विलोलज्जलदः कालः समुपागतश्चायमित्यादि काव्यानुसंधानबलाच्छिक्षाभ्यासनिर्वर्ति
तस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि तथान
भिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगाद्गम्यगमकभावादनुमीयमानोपि वस्तुसौ
न्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भाव
स्तत्रासन्नपि सामाजिकानां चर्व्यमाणो रस इति श्रीशंकुकः। न ताटस्थ्येन नात्मगतत्वेन रसः
प्रतीयते नोत्पद्यते नाभिव्यज्यते पि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणी
करणात्मना भावकव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानंदमयसंविद्विश्रा
न्तिसतत्त्वेन भोगेन भुज्यते इति भट्टनायकः। लोके प्रमदादिभिः कारणादिभिः स्थाय्यनु
मानेभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारव॰ ग्रं॰
त्त्वादलौकिकविभावादिशब्दव्यवहार्यैः ममैवैते शत्रोरेवैते न तटस्थस्यैवैते न मम न शत्रोरेवैते॰ ए

© Dharmartha Trust J&K. Digitized by eGangotri

इति संबंधिविशेषस्वीकारपरिहारानवसायात्साधारण्येन प्रतीतैरभिव्यक्तः सामाजिका
नां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपा
यबलात्तत्कालविगलितपरिमितप्रमातृतावशोन्मिषितवेद्यान्तरसंपर्कशून्यापरि
मितभावेन सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्च
र्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव स्फुर
न् हृदयमिव प्रविशन् सर्वांगीणमिवालिंगन्नन्यत्सर्वमिव तिरोदधद्ब्रह्मास्वादमिवानु
भावयन्नलौकिकचमत्कारकारी शृंगारादिको रसः स च न कार्यः विभावादिनाशेऽपि तस्य
संभवप्रसंगात् नापि ज्ञाप्यः सिद्धस्य तस्याभावात् अपि तु विभावादिभिर्व्यंजितश्चर्वणीयः
कारकज्ञापकाभ्यां अन्यत्क्व दृष्टमिति चेत् न क्वचिद्दृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेत
न्न दूषणं चर्वणानिष्पत्त्या तन्निष्पत्तिरुपचरितेति कार्योऽप्युच्यतां लौकिकप्रत्यक्षादि

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ९ 12 प्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यसंस्पर्शरहितस्वात्ममात्रपर्यवपरिमितेतर
योगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्ययोऽभिधीयतां तद्ग्राहकं च न नि
र्विकल्पकं विभावादिपरामर्शप्रधानत्वात् नापि सविकल्पकं चर्व्यमाणस्यालौकिकानंदम
यस्य तस्य स्वसंवेदनसिद्धत्वात् उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरताम
व गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः व्याघ्रादयो विभावा भयानकस्ये
व वीराद्भुतरौद्राणामश्रुपातादयोऽनुभावाः शृंगारस्येव करुणभयानकयोः । चिंतादयो
व्यभिचारिणः शृंगारस्येव वीरकरुणभयानकानामिति पृथगनैकांतिकत्वात्सूत्रे मिलि
ता निर्दिष्टाः वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः धरणिरभि
नवांकुरांकटंका प्रणतिपरे दयिते प्रसीद मुग्धे इत्यादौ । परिमृदितमृणालीम्लानमंगं प्र
वृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु कलयति च हिमांशोर्निष्कलंकस्य लक्ष्मीमभि रै॰ ९

© Dharmartha Trust J&K. Digitized by eGangotri

नवकोरदंनञ्चेस्यांद्रुःकपोलः इत्यादौ । दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किंचाञ्चितभ्रूलतं मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्ण
क्षणं चक्षुर्जातमहो प्रपंचचतुरं जातागसि प्रेयसि इत्यादौ च यद्यपि विभावानामनुभा
वानामौत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानां च व्यभिचारिणां केवलानामेवात्र स्थितिस्तथा
प्येतेषामसाधारणत्वमन्यत्र सद्भावेऽपि सत्त्वे सति नानैकान्तिकत्वमिति । तद्विशेषानाह
शृंगारहास्यकरुणरौद्रवीरभयानकाः बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः । तत्र
शृंगारस्य द्वौ भेदौ संभोगो विप्रलंभश्च । तत्राद्यः परस्परावलोकनाधरपानपरिचुंबनाद्यनंत
भेदत्वादपरिच्छेद्य इत्येक एव गण्यते । यथा । शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचि
च्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं विस्रब्धं परिचुंब्य जातपुलकामालोक्य
गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुंबिता । तथा । त्वं मुग्धाक्षि विनैव कं

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ख॰

13

ञ्चुलिकयाधत्सेमनोहारिणी लक्ष्मीमित्यभिधायिनिप्रियतमेतद्वीटिकासंस्पृशि शय्योपान्त
निविष्टसस्मितसखीनेत्रोत्सवानंदितो निर्यातःशनकैरलीकवचनोपन्यासमालीजनः । अप
रस्त्वभिलाषविरहेर्ष्याप्रवासशापहेतुकइतिपंचविधः क्रमेणोदाहरणं । प्रेमार्द्राःप्रणय
स्पृशःपरिचयादुद्गाढरागोदयास्तास्तामुग्धदृशोनिसर्गमधुराश्चेष्टाभवेयुर्मयि यास्वंतःक
रणस्यबाह्यकरणव्यापाररोधीक्षणादाशंसापरिकल्पितास्वपिभवत्यानंदसांद्रोलयः । अ
न्यत्रव्रजतीतिकाखलुकथानाप्यस्यतादृक्सुहृद्योमांनेच्छतिनागतश्चहहहाकोयंविधेःप्र
क्रमः इत्यल्पेतरकल्पनाकवलितस्वांतानिशांतांतरेर्बालावृत्तविवर्तनव्यतिकरानाप्नोति
निद्रांनिशि । एषाविरहोत्कंठिता । सापत्युःप्रथमेपराधसमयेसख्योपदेशंविनानोजाना
तिसविभ्रमांगवलनावक्रोक्तिसंसूचनं स्वच्छैरच्छकपोलमूलगलितैःपर्यस्तनेत्रोत्पला
बालाकेवलमेवरोदितिलुठल्लोलालकैरस्रुभिः । प्रस्थानंवलयैःकृतंप्रियसखैरस्रैरजस्रं

गे॰ ख

© Dharmartha Trust J&K. Digitized by eGangotri

गतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुरः यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थि
ता गंतव्ये सति जीवितप्रियसुहृत्सार्थः किमु त्यज्यते । त्वामालिख्य प्रणयकुपितां धातुरागैः
शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुं अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते
मे क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः । हास्यादीनां क्रमेणोदाहरणं । आकृष्य पा
णिमशुचिं मम मूर्ध्नि वेश्या मंत्राम्भसां प्रतिपदं पृषतैः पवित्रे तारस्वरं प्रथितथूत्कमदात्प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्मा । हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषो
धिक्प्राणान्पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां
गिरश्चित्रस्थानपि रोदयंति शतधा कुर्वंति भित्तीरपि । कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः नरकरिपुणा सार्धं तेषां सभीमकिरीटिनामयम
हमसृङ्मेदोमांसैः करोमि दिशां बलिं । क्षुद्राः संत्रासमेते विजहत हरयो भिन्नशक्रेभकुंभा

© Dharmartha Trust J&K. Digitized by eGangotri

युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतंतः सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं
मेघनादः किंचित्संरंभलीलानियमितजलधिं राममन्वेषयामि । ग्रीवाभंगाभिरामं मुहुरनुप
ततिस्यंदने दत्तदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं दर्भैरर्धावलीढैः श्रम
विवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति । उत्कृ
त्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिंड्याद्यवयवसुलभान्युग्र
गंधीनि जग्ध्वा आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगत
मपि क्रव्यमव्यग्रमत्ति । चित्रं महानेष बतावतारः क्व कांतिरेषाभिनवैव भंगिः लोकोत्तरं धै
र्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः । एषां स्थायिभावानाह । रतिर्हासश्च शोकश्च क्रो
धोत्साहौ भयं तथा जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः । स्पष्टं । व्यभिचारिण आ
ह । निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः आलस्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः

© Dharmartha Trust J&K. Digitized by eGangotri

व्रीडाचपलताहर्षआवेगोजडतातथा गर्वोविषादऔत्सुक्यंनिद्रापस्मारएवच सुप्तंविबो
धोमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथामरणमेवच त्रासश्चैववितर्क
श्चविज्ञेयाव्यभिचारिणः त्रयस्त्रिंशदमीभावाःसमाख्यातास्तुनामतः ॥ निर्वेदस्यामंग
लप्रायस्यप्रथममनुपादेयत्वेप्युपादानं व्यभिचारित्वेपिस्थायिताभिधानार्थं तेननिर्वेदस्थायि
भावोस्ति । शांतोपिनवमोरसः । यथा । अहौवाहारेवाकुसुमशयनेवादृषदिवा मणौ
वालोष्टेवाबलवतिरिपौवासुहृदिवा तृणेवास्त्रैणेवाममसमदृशोयांतिदिवसाः क्वचित्पु
ण्यारण्येशिवशिवशिवेतिप्रलपतः । रतिर्देवादिविषयाव्यभिचारीतथांजितः भावःप्रोक्तः ।
आदिशब्दान्मुनिगुरुनृपपुत्रादिविषयाकांताविषयातुव्यक्ताशृंगारः । उदाहरणं । कंठको
णविनिविष्टमीशतेकालकूटमपिमेमहामृतं अप्युपात्तममृतंभवद्वपुर्भेदवृत्तियदिरोच
तेनमे । हरत्यघंसंप्रतिहेतुरेष्यतः शुभस्यपूर्वाचरितैःकृतंशुभैः शरीरभाजांभवदीयदर्श

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ १५
15

नेष्वनत्रिकालत्रितयेपियोग्यता । एवमन्यदप्युदाहार्यं । व्यभिचारीयथा । जानेकोपपराङ्मु
खीप्रियतमास्वप्नेद्यदृष्टामयामामांसंस्पृशपाणिनेतिरुदतीगन्तुंप्रवृत्तान्ततः नोयावत्परिरभ्य
चाटुकशतैराश्वासयामिप्रियां भ्रातस्तावदहंशठेनविधिनानिद्रादरिद्रीकृतः । अत्रविधिंप्र
त्यसूया । तदाभासाअनौचित्यप्रवर्तिताः । तदाभासारसाभासाभावाभासाः । तत्ररसाभासे
यथा । स्तुमःकंवामाक्षिक्षणमपिविनायंनरमसेविलेभेकःप्राणान्रणमखमुखेयंमृगयसे
सुलग्नेकोजातःशशिमुखियमालिङ्गसिबलात्तपःश्रीःकस्यैषामदननगरिध्यायसितुयं ।
अत्रानेककामुकविषयमभिलाषंतस्याःस्तुमइत्याद्यनुगतंबहुव्यापारोपादानंव्यनक्ति ।
रसभावोयथा । राकासुधाकरमुखीतरलायताक्षीसास्मेरयौवनतरङ्गितविभ्रमास्ते तत्किं
करोमिविदधेकथमत्रमैत्रींतत्स्वीकृतिव्यतिकरेकइवाभ्युपायः । अत्रचिन्तानौचित्यप्रवर्ति
ता एवमन्येप्युदाहार्याः । भावस्यशान्तिरुदयःसंधिःशबलतातथा । क्रमेणोदाहरणम् । गं॰ १५

© Dharmartha Trust J&K. Digitized by eGangotri

नस्याः सांद्रविलेपनर्त्तननटमङ्गष्ठङ्गांकितं किंवक्त्रस्य गणानां निख्यानिकरव्याजेन गोपायते
दृतस्त्रज्ञाङ्कनादिसुदीन्यसहमानसंप्रमार्ष्टुमयामास्त्रिण्णा कभसेनननह्यखवशाद्रस्यास्तुनहि
स्मृतं । अत्र कोपस्य । एकस्मिन्शयने विपक्षरमणीनामग्रहे मुग्धया सद्यः कोपपराङ्मुखं
ग्लपितया चाटूनि कुर्वन्नपि आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणान्मा भूत्सुप्त इवे
त्यमंदवलितग्रीवं पुनर्वीक्षितः । अत्रौत्सुक्यस्य । उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमा
देकतः सत्संगप्रियतया च वीररभसोत्फालश्च मां कर्षतः वैदेहीपरिरंभ एष च मुहुश्चैतन्यमा
मीलयन्नानंदी हरिचंदनेन्दुशिशिरः स्निग्धो रुणद्ध्यन्यतः । अत्रावेगहर्षयोः । क्वाकार्यं शशा
लक्ष्मणः क्वच कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेपि कांतं मुखं
किंवक्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा ध
न्योधरं पास्यति । अत्र वितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानां भावस्थितिसत्त्वाचो
© Dharmartha Trust J&K. Digitized by eGangotri

का· प्र· १६ 16

दाहृताश्च। मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन। ते भावशान्त्यादयः अङ्गित्वे राजानुगतविवा
हप्रवृत्तभृत्यवत्। अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः शब्दार्थोभयशक्त्युत्थस्त्रिधा स
कथितो ध्वनिः। शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यः अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यः उभयश
क्तिमूलानुरणनरूपव्यङ्ग्यश्चेति त्रिविधः। तत्र। अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते प्र
धानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा। वस्त्वेवेति अनलङ्कारं वस्तुमात्रं आद्यो यथा। उल्लास्य
कालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन निर्वापितः सकल एव रणे रिपूणां
धाराजलैस्त्रिजगति ज्वलितः प्रतापः। अत्र वाक्यस्यासम्बद्धार्थाभिधायकत्वं मा प्रसाङ्क्षीदिति प्राकर
णिकाप्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इत्यत्रोपमालङ्कारो व्यङ्ग्यः तिग्मरुचिर
प्रतापो विधुरनिशाकृद्विभो मधुरलीलः मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भ
वान्। अत्रैकस्य पदस्य द्विपदत्वे विरोधाभासः। अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो॰

गं· १५

© Dharmartha Trust J&K. Digitized by eGangotri

अहितः सहितः साधुयशोभिरसतामपि । अत्रापि विरोधाभासः । निरुपादानसंभारमभि
त्तावेव तन्वते जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने । अत्र व्यतिरेकः अलंकार्यस्यापि
प थि क न त्र स्र स्त रो लि म ना कु प्र स्त
ब्राह्मणश्रमणन्यायेनालंकारता । वस्तुमात्रेण यथा । पथिय ण एत्थ सत्थरमत्थि मण पत्थ
र स्थ ले ग्रा मे उ न्न तं प यो ध रं प्रे क्ष्य य दि व स सि त द्व स
रत्थले गामे उन्नअपओहरं पेक्खिऊण जइ वससि ता वससु । अत्र यद्युपभोगक्षमोसि त
दास्स्वेति व्यज्यते । शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वं यत्र प्रसीदसि पुनः
स भात्युदारोनुदारश्च । अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकमेव कार्यं कुरुत इति ध्वन्यते
अर्थशक्त्युद्भवे व्यङ्ग्ये व्यञ्जकः संभवी स्वतः प्रौढोक्तिमात्रान्निष्पन्नो वा कवेस्तेनोम्भितस्य वा
वस्तु वालंकृतिर्वेति षड्भेदोसौ व्यनक्ति यत् वस्त्वलंकारमथवा तेनायं द्वादशात्मकः ।
स्वतःसंभवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन संभाव्यमानः कविना प्र
तिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वा वक्त्रेति द्विविधोपर इति त्रिविधः वस्तु

© Dharmartha Trust J&K. Digitized by eGangotri

का० प्र० १२

17

अलससिरोमणिः

वा अलंकारो वाच्यं यद् गिरिंद्वादप्यभेदो यथा चन्द्रबोधनैः । क्रमेणोदाहरणं । अलससिरोमणी

सं नां णं आ अमो अ त्रिधन स मृ द्धिमयः इति भणितेन न नां गी म फुल्ल विलोचना जाता

धुत्ताणं अग्गिमो अत्तिधणसमिद्धिमओ इअ भणिए णणंगीपप्फुल्लविलोअणाजाआ । अत्र

ममैवोपभोग्य इति वक्तव्ये नाव लभ्यते । धन्यासि या कथयसि प्रियसंगमेपि विश्रब्धचाटुक

शतानि रतान्तरेषु नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि

अत्र त्वमधन्या अहं तु धन्येति व्यतिरेको लंकारः । दर्पान्धगन्धगजकुम्भकपाटकूटसंक्रान्तनि

घ्नघनशोणितशोणशोचिः वीरैर्व्यलोकि युधि कोपकषायकान्तिः कालीकटाक्ष इव यस्य

करे कृपाणः । अत्रोपमालंकारेण सकलरिपुबलक्षयः क्षणात्करिष्यत इति वस्तु । गाढ

कान्तदशनक्षतव्यथासंकटादरिवधूजनस्य यः ओष्ठविद्रुमदलान्यमोचयन्निर्दशन्युधि रु

षा निजाधरं । अत्र विरोधालंकारेण अधरनिर्दशनसमकालमेव शत्रवो व्यापादिता इति

तुल्ययोगिता समकालत्वान्यस्य चानेन निवर्त्यनामिति न तु झटिति प्रत्ययेत्यनश्चस्तुत्येनाच पयूदाह गं० १२

© Dharmartha Trust J&K. Digitized by eGangotri

वर्णोऽयं स्वनः संभवी व्यंजकः । कैलासस्य प्रथमशिखरे वेणुसंमूर्छनाभिः श्रुत्वा कीर्तिं वि
बुधरमणीगीयमानां यदीयां स्रस्तापाङ्गाः सरसबिसिनीकाण्डसंजातशंका दिङ्मातंगाः श्र
वणपुलिने हस्तमावर्तयन्ति । अत्र वल्लनाद्येषामप्यर्थाधिगमो नास्ति तेषामप्येवमादि
कै मी प्र ब ला ल्या रे ण जे न स म
बुद्धिजननेन चमत्कारं करोति । यत्कीर्तिरिति निवस्तध्वन्यते । कैमैसबेलामेफणातेनसम
रे ज य श्रीः र ही ता य था कं द रा भि वि ध रा न सु हृ पे कं दे स स्या प्रि ना
रुस्मिज श्रसिरीगाहिप्राजहाकंदराहिविद्धरा नस्मेदफ्रुकाल्टेप्रस्मिसणादेविष्ठा ॥ अत्रके
शाग्राह्वावल्लोहीपिनमदनाश्वकंदरारत्नान्विधरान्कंटेश्लेतीत्रन्येनतोवा एकत्रसंग्रामे विज
यदर्शनात्तस्यारयः पलायमानग्रहाणामिह नितीनिकाम्यहेतुः नपलायमानानांतद्वैरिणोपि त्वय
गा जो लि ग ने र भ सो य जे द थि ने ल कु
राभवे संभाव्यमानानां कंदराणां त्यजन्तीत्यपह्नुतिः । गाजोलिगनरहसोजश्रसि देयपलकु
स म य स यं ति म न चि नी ना म नः पी र न भी हः र व हृ द ये भः
समसरहमणसिणीणमाणीपीलणभी रहवहिहयभाहि । अत्रोहेत्यागमन्यालिशाना
या स्थ वि रे मिवहृ से नी क वि प द ना बु न ह ब ह वि ति वे शा द सं यति भ
दिचनवजम्बनेरनिवस्ता । जाथवीरवहमतीकश्वप्रपाबुसहृ बहविणिवेसाहावे स्तम्भ

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ८

18

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

गो॰ ८

© Dharmartha Trust J&K. Digitized by eGangotri

म हि ला स ह स्र भ रि ते त व हृ द ये सु भ ग सा अ मां

यावत्तेषामसंप्रसादपादं जानाति विषन्न । महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअं

ती अ नु दि न म न न्य क र्मा अं ग त नु क म पि त नू क रो ति

ती अणुदिणमणण्णकम्मा अंगं तणुअं पि तणुएइ । अत्र हेत्वलंकारेण तनोस्तनूक

रणेऽपि न तव हृदये वर्तत इति विशेषोक्तिः एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरी

रो व्यंजकः एवं द्वादश भेदाः ॥ ३५४ ॥ शब्दार्थोभयभूरेकः । यथा । अतन्द्रचन्द्राभर

णा समुद्दीपितमन्मथा तारकातरला श्यामा सानन्दं न करोति कं । भेदा अष्टादशास्य तत् ।

अस्येति ध्वनेः ननु रसादीनां बहुत्वे कथमष्टादशेत्याह । रसादीनामनन्तत्वाद्भेद एको हि गण्य

ते । अनन्तत्वादिति यथा हि नव रसाः तत्र शृंगारस्य द्वौ भेदौ । संभोगो विप्रलंभश्च । संभो

गस्यापि परस्परदर्शनालिंगनपरिचुंबनादि कुसुमोच्चयजलकेलिसूर्यास्तमयचन्द्रो

दयर्तुषट्कवर्णनादयो बहवो भेदाः विप्रलंभस्याभिलाषादय उक्ताः उभयोरपि

विभावानुभाववैचित्र्यम् तत्रापि नायकयोरुत्तममध्यमाधमप्रकृतित्वं तत्रैव देशकालं

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ १९

वस्याभेदाद्वस्त्वेकस्यैव यस्य स्थानेन्यत्वं कारणानामन्येषाम्‌ असंलक्ष्यक्रमव्यंग्यस्य सामान्यमाश्रि
त्य समासादिष्वनिरेकप्रकारात्प्रपंचे । वाक्ये द्व्युत्थः । द्व्युत्थ इति शब्दार्थोभयशक्तिमूलः । पदेऽप्यन्ये ।
एकावयवसंस्थेन भूषणेनेव कामिनी पदद्योत्येन सुकवेर्ध्वनिना भाति भारती । अपिशब्दा
द्वाक्ये एकावयवस्थितेन भूषणेन कामिनीव पदद्योत्येन व्यंग्येन वाक्यव्यंग्यापि भारती भास
ते । तत्र पदप्रकाशत्वेक्रमेणोदाहरणं । यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा
अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति । अत्र द्वितीयमित्रादिशब्दा आश्वस्तत्वनियंत्र
खल व्यव हारा दृश्यन्ते दारुणा यद्यपि तथापि धीरा
णत्वस्नेहपात्रत्वादिसंक्रमितवाच्याः । खलववहारा दीसंति दारुणा जइवि तहवि धीरा
णां हृदयवयस्यबहुमता न खलु व्यवसाया विमुह्यन्ति
णं हिअअवअस्सबहुमआ ण हु ववसाआ विमुज्झंति । अत्र विमुज्झंतीति । लावण्यं तद
सौ कान्तिस्तद्रूपं स वचःक्रमः तदा सुधास्पदमभूदधुना तु ज्वरो महान् । अत्र तदादिपदैः
अनुभवैकगोचरा अर्थाः प्रकाश्यन्ते । यथा । मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्य

© Dharmartha Trust J&K. Digitized by eGangotri

नेमानंदघनस्त्वयूर्तिंबुधानक्रूरज्ज्ञनतोहृदेक्रमस्येयसि सत्त्वेवंयतिबोधितान्प्रतिवचसामाहृभी
नानना नीचैःशंसहृदिस्थितोहिनत्रमेप्राणेश्वरःपोष्यति । अत्रभीनाननेत्यनेननीचैःशं
सनविधानस्यफलज्ञनतागम्यते भावादीनांचपदस्यकाशाद्वोधकेनवैचित्र्यमितिनतद्दाक्षि
प्यते । रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघः झटितिभ्रुकुटिविटंकित
ललाटपट्टोविभासितरूपभीमः । अत्रभैरवीयस्यभीमसेनउपमानं भ्रुकुटिभ्रुकुटिकृदेकांत
समादेशाननन्तरः कस्यनानंदनिष्यंदंविदधातिसदागमः । कदाचित्संकेतदायिनमेवप्र
त्यपयाहृदयमागौसति । सायंस्नानमुपासितंमलयजेनांगंसमालिंगितं यातोस्ताचलमौलि
मंबरमणिर्विस्रब्धमेदागतिः आश्चर्यंतवसौकुमार्यमभितःक्लांतासियेनाधुना नेत्रद्वंद्वम
मीलनव्यतिकरंशक्नोतिनेनासितुं । अत्रवल्लभानाहृतनपरपुरुषपरिचर्यास्नानासीनिवस्त्वध
नापदश्योतिनंव्यज्यते नदयामिमहाड्डंग्वविलीनाशेषमानकाः नदीननमहाज्ञादद्दीणाः

© Dharmartha Trust J&K. Digitized by eGangotri

का. प्र. ६ ४०

पुण्यचया तथा चिन्तयन्ती जगत्सूतिं परंब्रह्मस्वरूपिणं । निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका
अत्र जन्मसहस्रैरुपभोक्तव्यानि दुष्कृतसुकृतफलानि वियोगदुःखचिन्तनाह्लादाभ्यामनुभूता
नीत्युक्तं । एवं चाशेषपदद्योत्ये अतिशयोक्तौ क्षणदासावक्षणदा वनमवनं व्यसनमव्यसनं
बत वीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वं । अत्र शब्दशक्तिमूलविरोधाङ्गेनार्थान्तरन्यासे
न विधिरपि त्वामनुवर्तत इति सर्वपदद्योत्यो व्यङ्ग्यः । तरुवल्लहसमगोसम्मिश्रामितब्रह्मगोमिलाण
कमण्डलौ इत्यणावकृशास्त्रनागाङ्कणाङ्गवग्रणामहीसद्गुहः । अत्र द्रुपकेनत्वया स्वयमुत्कृष्टे
ज्ञः परिवृंहितं कृतं येन म्लानत्वमिति निमिलाणादिपदद्योत्यं काव्यलिङ्गं । एवं स्वनः संभवी व्यञ्ज
कः । रात्रिश्चेदधवला सत्ततिलिग्रप्रक्षालितत्तृणाजोच्चाधे एकस्मिन्नगिग्रकूणाद्यभुवनरत्नेवि
ज्ञेवनो । अत्र वरतनायेषां कामिनामसौ राज्ञा स्मरसेभ्यो न कश्चिद्दीपनदादेशपरोऽग्रवर इतिज्ञा
यदिह रूपभोगपरैरेव तैः निपातितावास्ते इति भुवनराज्यपदद्योत्यं वस्तुप्रकाशपने । निशितशरा

गं. २.

रथियापर्ययन्तनं गोहृशिमहृहरिः स्वबलं वघस्यराले हिमिनिपननियत्रस्नाचनत्र्यतिकरमेन्य
समुन्मिषेन्त्वरयाः । अत्रवस्तुनाकगापदवस्याःपरस्परविरुद्धा अपिभवंतीति व्यतिकरपदयो
न्योविरोधः । वारिजंनोविपुलोमंदावकदाल्पियणाहि अपणास्यनभरपवघस्पे पणंणावलइमे
हरो । अत्रविरुद्धत्वानिवसवणाहेत्वलंकारेणहारेणवरनंकम्पमानइवालेइतिनचलती ।
निपदस्यंगपवस्तु । सोऽमृदसामेगलोधमिलोकलिअललिअणामदेहो नेइस्वंथइवलंलहि
अ सरोसरअसंगरोजयति । अत्रहृपकेनअरुराकर्षणेननयाकेशपाशः स्कंधयोःप्राप्तोयस्या
इतिविरतावप्यतिहृत्राभिलाषःकामुकोभूदितिस्कंदपदयोन्याविभावना पञ्चकविप्रोक्तोक्ति
मात्रनिष्पन्नशरीरः । णावग्रामिमामि अंकः सप्तहृअकोनंसिवणामहमहृसत्तं वसेहृमासम
गापगेम रअणिमानहृअज । अत्रवस्तुनामयीवान्यस्यामपिप्रथममनुरक्तास्वेननन इतिणावे
न्यादिप गेमीत्यादिपदयोन्यंवस्तुव्यज्यते । सहिणवीणकवणासमरास्मिअंकरालीसहीइणि

© Dharmartha Trust J&K. Digitized by eGangotri

का॰
प्र॰
स
२१
21

विशेषणाहारिणोवारितो स्वेष्वर्णगर्भंतेनोन्नदोकहंरसिग्रम् । अत्रवर्णनाहाररूछेदेनंतंनरमन्यदेव
नरमवपमस्तुनत्वकथयकोहंगनिस्थनिरेकः कथंपदगम्यः । पविसंतोप्यवगावेविदलिग्रव
ग्रणाग्रलोऽस्यणपहम् खंधेचेत्तूणवत्वंहाहाणहोविवस्हसिसंहाकिविव । अत्रहेवलं
कारेणसंकेतनिकेतनंगच्छेतंकोनेहृष्टायदितत्रगच्छेन्नमिच्छसि नदपरंहृदंस्पृहीत्वागच्छेति
वक्तृकिंचिपदस्यंगं । विहल्लंवणांतमसहिर्दंत्वणक्रेनेनतल्लनरादिहिवारस्फुंसमिमेण
ग्रण्यागरुवोविपाहिग्रविहिम । अत्रनदीकूललेलनागहनेक्षनसंकेतमप्रांसंरुहम्पवेषाव॰
सेरपश्चादागतेहृष्ट्वा ग्रनर्नदीगमनायदुरागतात्व्याजेनबुद्धिपूर्वंव्याकुलयात्वयावरःस्फो
टितइति मयाचेतितंनत्किमिति त्वनास्वसिषितत्समीहितमिदृग्येवसप्रहृं नेसवभूनिकटेसवं
समर्थयिषो इतिहारस्यर्शोमिषेणोऽन्यपदृस्याकल । जहायप्रहरसेणग्रवरम्भ नाहण॰ मे॰
त्ममणा सावहसाविणबोफधपरवह्नः अहहहरस्नवहहिग्रपम । अत्रकाव्यलिंगेन॰ रा

© Dharmartha Trust J&K. Digitized by eGangotri

हृद्गांपरवश्यं वास्मात्तु दिलाभिलषसीति त्वदीयमाचरितं वक्तुं न शक्तोस्मीत्यादेः परवध्वस
त्तूप्रकाशः पञ्चकविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः वाक्यप्रकाश्येन पूर्ववदुदा
हृतं। प्राह्यार्थोभयशक्त्युद्भवस्तु पदप्रकाश्यो न भवतीति पंचत्रिंशद्भेदाः। प्रबंधेप्यर्थशक्त्यु
द्भूः। यथा गृध्रगोमायुसंवादादौ भारते। यथा च। अलं स्थित्वा श्मशानेस्मिन्गृध्रगोमा
युसंकुले कंकालबहुले घोरे सर्वप्राणिभयंकरे नचेह जीवितः कश्चित्कालधर्ममुपागतः
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी। इति दिवा प्रभवतो गृध्रस्य पुरुषविसर्जनपर
मिदं वचनं। आदित्योयं स्थितो मूढाः स्नेहं कुरुत सांप्रतं बहुविघ्नो मुहूर्तोयं जीवेदपि क
दाचन अमुं कनकवर्णाभं बालमप्राप्तयौवनं गृध्रवाक्यात्कथं बालास्त्यजध्वमविशंकि
ताः। इति निशि विजृंभमाणस्य गोमायोर्जनव्यावर्तननिष्ठं चेति प्रबंध एव प्रथते। अन्ये त्वे
कारणप्रभेदाः ग्रंथविस्तरभयान्नोदाहृताः स्वयं तु लक्ष्यतोऽनुगंतव्याः अपि साह्यात्पद

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ टी॰ २२

वाक्ययोः । तत्र प्रकृतन्याययथा । रसकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य

रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति । अत्र जयतीति न तथा शोभते इत्यादिसमानेऽपि हि ।

स्थगनव्यापारे लोकोत्तरेऽपि विद्यमाने पिधानमिति न तदेवोत्कृष्टं । तथा । येयान्साययत्रपाहु

नस्मशापष्ठंपादाननः कांनयाहिर्त्राणेवपदानिवासभवनाभावत्रयास्तन्मनाः नावस्पस्तनप

णिमस्फुटलसत्रीवीतिनिवद्धं धृतो धाविन्वेवहृतनयणामकमहोप्रेमणोविविचाणतिः । अत्रपदा

नीतिनतद्धारा दीनीति । निद्गपोर्थयथा । पथिपथिशुकचंचूचारुराभांकुराणां दिशिदिशिप

वमानो वीरुधांलासकश्च नरिनरिकिरतिद्राक्सायकान्पुष्पधन्वा पुरिपुरिचनिरुन्द्धमानिनी

मानचर्चा । अत्रकिरतीतिकिरणस्यसाध्यमानत्वंनिरुन्द्धेति निवर्तनस्यसिद्धत्वंनिजास्वपात्र

नत्रापिकुमप्रत्ययेनातीतत्वंद्योत्यते । यथावा लिखन्नास्तेभूमिंवहिरवनतः प्राणदयितो निरा गु॰

हाराः सख्यः सततरुदितोच्छूननयनाः परित्यक्तं सर्वं हसितपठितं पंजरशुकैस्तवावस्थाचेयं रा॰

© Dharmartha Trust J&K. Digitized by eGangotri

विसृज्यक दिने मानमथना। अत्र न लिखितो न्यपितप्रमादपर्यन्तमास्ते तथा स्ते इति निन्यासि

न इति भूमिमिति नन्तभूमाविति न हि बुद्धिपूर्वकं किंचिल्लिखित इतीति सुविभक्तीनां व्य

यं। गामिमिति ग्रेहि गामेव मामित्यत्रापि अग्राणि ग्रामिणा अग्रग्राणाम परिणोहं गामिज्ञाहोमि

स्वाहोमि। अत्र नागरिकाणामिति निबहुव्रीः रमणीयः क्षत्रियकुमार आसीदिति कालस्य।

एषाहि भग्नमाहेश्वरकार्मुकं दाशरथिं प्रति रूपितस्य भार्गवस्योक्तिः। वचनस्य यथा। ता

लं गुणमाहणाणं ताणं हो कंठाणत्वस्स पेमासमताणभणिआणं संदरसीसमंजाश्रेअवसणाम।

अत्र गुणग्रहादीनां बहुत्वं प्रेम्णाश्चैकत्वं योज्यं। पुरुषव्यत्ययस्य यथा। रे रे चंचललोचनांचि

तरुचे चेतः प्रमुच्य स्थिरप्रेमाणं महिमानमेणनयना मालोक्य किं नृत्यसि किं मन्ये विहरिष्य

से वनहन्तां श्रेचां नरागामि मामेघांकं टनटे हृतावलम्बिलासं मा तवा तोनिधे। अत्र प्रहासः

पूर्वेनिपातनस्य यथा। येषां दोर्बलमेव दुर्बलतया ते संमितास्तैरपि प्रायः केवलनीतिरीतिश

© Dharmartha Trust J&K. Digitized by eGangotri

का० प्र० स्व

23

र्थयोः कार्यं किमुर्वीधरैः येनाशाक्रान्तः पराक्रमनयस्वीकारकान्तक्रमालेनस्तुनैवभवादृशा
स्त्रिजगति हिज्ञाः पवित्राः परं । अत्र पराक्रमस्य प्राधान्यं गम्यते । विभक्तिविशेषस्य यथा ।
प्रधनाध्वनिधीरधनुर्ध्वनिभृति विधुरैरयोधितवदिवसं दिवसेनतुनरप भवानयुद्धविधिसि
द्धसाधुवादपदं । अत्र दिवसेनेत्यपवर्गे तृतीया फलप्राप्तिं द्योतयति । भूयोभूयः सविधन
गरीरथ्यायां पर्यटन्तं दृष्ट्वादृष्ट्वा भवनवलभीतुङ्गवातायनस्था साक्षात्कामं नवमिव रतिर्मा
लतीमाधवं यद्गाढोत्कण्ठालुलित ‥ रङ्गकैस्ताम्यतीति । अत्रानुकम्पावृत्तेः कद्वितनद्धित
स्य । परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान्
विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते । अत्र प्र
शब्दस्योपसर्गस्य । कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः तमांसि ति
ष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलितां । अत्र तत्पयोगिनाशोनकस्य च द्वितनि

टी० स्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

पातस्य । रामोसौभुवनेष्वविक्रमगुणैः प्राप्तः प्रसिद्धिं परामस्मद्भाग्यविपर्ययाद्यदि परं दे
वोनजानातितं वंदीवैषयशांसिगायतिनमःस्यैकबाणाहतिश्रेणीभूतविशालतालविव
वरणोद्गीर्णैः स्वरैः सप्तभिः । अत्रासावितिभुवनेष्वितिगुणैरितिसर्वनामवचनप्रातिप
दिकवचनानां नत्वादितिनमादिति अपित्वस्मादितिसर्वादेरपिणोभाग्यविपर्ययादित्य
र्थासंपत्तिरूपत्वेननत्वभावरूपत्वेनाभिधानस्य । नक्षत्राणामगणाकलयतिकलामस्रमदन
धन्वभ्रुवोः पत्रत्वग्रे अधिवसतिसकलललनामौलिमियंचाकिनहारिणानयना । अत्रय
